संस्कृत-वार्ता:

दिनाङ्क : 29/01/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- *वित्तमंत्री निर्मलासीतारमणवर्या संसदि विंशति-पञ्चविंशति-षड्विंशति आर्थिकसर्वेक्षणं प्रस्तुतवती ; सर्वेक्षणे र्तमानवित्तवर्षे देशस्य सकलगृहोत्पादस्य वास्तविक-वृद्धिः सप्त-दशमलव-चत्वारि प्रतिशन्मितं स्थातुम् अनुमिता अस्ति ।*

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य भारत-यूरोपीयसङ्घयोः मध्ये जातम् ऐतिहासिकं मुक्तव्यापार-सन्धेः महत्त्वं प्रकाशयता, महत्त्वाकांक्षि-भारतस्य कृते, महत्त्वाकांक्षि-युवानां कृते, आत्म-निर्भर-भारतस्य कृते च मुक्तव्यापारः इत्यस्य वर्णनम् कृतम् सहैव निर्मातृभिः एषः अवसरः अधिगन्तुं प्रयासः विधातव्यः इति कथितम् ।

- सर्वोच्चन्यायालयेन विश्वविद्यालय-अनुदान-आयोगस्य विनियमः, 2026 इत्येषः स्थगितः ।

- सप्तसप्तति-तमस्य गणतन्त्रसमारोहस्य समापनं निदर्शयन् बीटिङ्ग्-रिट्रीट्-समारोहः अद्य नवदिल्ल्याः विजयचौक इत्यत्र सम्पन्नोऽभवत् ।

- महाराष्ट्रस्य उपमुख्यमन्त्रिणः, राष्ट्रवादि-कॉन्ग्रेस-दलस्य अध्यक्षः अजितपवारः इत्यस्य च अन्तिमसंस्कारः पुणे-नगरस्य बारामती-नगरे पूर्णराज्य-सम्मानेन सह अभवत् । सर्वेषां दलानां नेतारः तस्य अन्तिमसंस्कारे भागम् अगृह्णन् ।
- महिला-प्रीमियर-लीग् इति क्रिकेट्-क्रीडायां यू. पी. वारियर्स् इत्येतत् दलम् अद्य सायङ्काले गुजरातस्य वडोदरानगरे रायल्-चैलेञ्जर्स्-बेङ्गलुरु इत्यनेन दलेन सह क्रीडिष्यति ।

अथ वार्ता: विस्तरेण

आर्थिक-सर्वेक्षणम् -

आगामि-वित्तीयवर्षे देशस्य जीडीपी इति सकलगृहोत्पादस्य वृद्धिमितिः सप्त-दशमलव-चत्वारि-प्रतिशन्मितं यावत् भवितुं शक्नोति । सप्तविंशत्युत्तर-द्विसहस्रतमाब्दे देशस्य आर्थिकवृद्धिः षट्-दशमलव-अष्ट-प्रतिशन्मिततः सप्त-दशमलव-द्वे प्रतिशन्मितं यावत् भवितुम् अर्हति । वित्तमन्त्री निर्मलासीतारमण-वर्यया अद्य संसदि उपस्थापितायां आर्थिकसमीक्षायां एतत् प्रख्यापितम् अस्ति । आर्थिक-सर्वेक्षणानुसारं, भारतीय-अर्थव्यवस्था षड्-विंशत्युत्तर-द्विसहस्रतमे वित्तीयवर्षे प्रबल-वृद्धि-गतिं प्राप्नोति । प्रथम-अग्रिमेषु अनुमानेषु जी. डी. पी. इत्यस्य वास्तविक-वृद्धिः सप्त-दशमलव-चत्वारि-प्रतिशन्मितं अस्ति , यस्य वृद्धिः बहुधा देशीय-आग्रहात् प्रेरिता भवति। निजोपभोगः, अर्थ-निर्माणम् च विस्तारस्य समर्थनं निरन्तरं कुरुतः, परन्तु आपूर्ति-पक्षे सेवाः प्रमुख-योगदान-कर्तारः एव तिष्ठन्ति। अपरत्र देशे उत्पादन-क्रियाकलापः सुदृढः अभवत्, कृषिः च स्थिरतां प्रायच्छत् । सर्वेक्षणे इदमपि उल्लेखितम् यत् वैश्विक-आर्थिक-पर्यावरणं अनिश्चितम् अस्ति, भू-

राजनैतिक-व्यवधानैः, प्रमुखासु अर्थव्यवस्थासु व्यापार-व्यवधानैः च निर्मितम् अस्ति । आर्थिक-समीक्षया इदमपि सूचितं यत् देशस्य सद्यः कृत-आर्थिक-प्रदर्शनं प्रादर्श्यत यत् अशान्ते वैश्विकार्थिक-वातावरणे अपि स्थूल-आर्थिक-स्थिरतां वृद्धिं च धारयितुं शक्यते । आर्थिक-सर्वेक्षणं देशस्य वर्तमान-आर्थिक-स्थित्याः भविष्य-दृष्टिकोणस्य च समग्र-समीक्षा अस्ति ।

## पि. ए. आर्. -प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य भारत-यूरोपीयसङ्घयोः मध्ये जाता ऐतिहासिकी मुक्तव्यापार-सन्धिः प्रशंसिता अस्ति । अस्य सन्धेः महत्त्वं प्रकाशयन्, श्रीमोदी, महत्त्वाकांक्षि-भारतस्य कृते, महत्त्वाकांक्षि-यूनां कृते, आत्म-निर्भर-भारतस्य कृते च मुक्तव्यापारः इत्यस्य वर्णनम् अकरोत् । अद्य आय-व्ययक-सत्रस्य द्वितीये दिवसे नवदिल्ल्यां संसदभवन-परिसरे प्रधानमन्त्री प्रसारमाध्यमान् सम्बोधयन् आसीत् ।

श्रीमोदी सर्वान् संसद-सदस्यान् राष्ट्रस्य विकासाय रचनात्मक-रूपेण कार्यं कर्तुं प्रार्थयत् ।

## सर्वोच्चन्यायालयः-यूजीसी

सर्वोच्चन्यायालयेन अद्य विश्वविद्यालय-अनुदान-आयोगाय आदेशः दत्तः यत् (उच्च-शिक्षण-संस्थानां समता-संवर्धनम्) विनियमः, 2026 इत्येषः स्थगितः भवेत् । न्यायालयेन विनियमानां विषये काश्चित् आपत्तयः प्रकटिताः, याः सामान्यवर्गस्य प्रति भेदभावयुक्ताः भवितुं शक्नुवन्ति । न्यायालयेन सूचितं यत् प्रख्यात-न्यायविदानां समित्या विनियमानां पुनरवलोकनं कर्तव्यम् । न्यायालयः अवदत् यत् विनियमाः प्रथमदृष्ट्या अस्पष्टाः, दुरुपयोगाय समर्थाः च सन्ति । न्यायालयः 2026 विनियमस्य संवैधानिकतायाः विरोधं कुर्वतां तिसृणां रिट्-याचनानां पक्षे विचारं कुर्वन् आसीत् । सर्वोच्चन्यायालयेन केन्द्राय विश्वविद्यालय-अनुदान-आयोगाय च याचिकानां विषये सूचना दत्ता, या मार्चमासस्य नवदश-दिनाङ्के प्रत्यर्पणीया आसीत्। तावत्पर्यन्तं नवनिर्मिताः नियमाः स्थगिताः सन्ति। न्यायालयेन इतोऽपि आदेशः दत्तः यत् द्वाविंशत्युत्तर-द्विसहस्रतमाब्दस्य विनियमाः तावन्मध्ये प्रवर्तयिष्यन्ते ।

## पवार-अन्तिमयात्राः

महाराष्ट्रस्य उपमुख्यमन्त्रिणः, राष्ट्रवादि-कॉन्ग्रेस-दलस्य अध्यक्षः अजितपवारः इत्यस्य च अन्तिमसंस्कारः पुणे-नगरस्य बारामती-नगरे राजकीय-सम्मानेन सह अभवत् । ह्यः बारामती-विमानस्थानकस्य समीपे विमान-दुर्घटनायां एन्. सी. पी. प्रमुखः, अन्ये च चत्वारः जनाः मृताः अभवन् । तस्य पुत्रौ पार्थः जयः च विद्या-प्रतिष्ठान-क्षेत्रे अन्तिमसंस्कारं कृतवन्तौ। केन्द्रस्य राज्यस्य च अनेके वरिष्ठनेतारः अन्त्येष्टिक्रियायां भागम् अगृह्णन्। एतेषु केन्द्रीयमन्त्री अमितशाहः, नितिनगडकरी, महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र-फड्नविसः, उपमुख्यमन्त्री एकनाथ-शिन्दे, भाजपा-दलाध्यक्षः नितिन-नबीनः, एन्. सी. पी. दलप्रमुखः शरद-पवारः, अन्ये बहवः नेतारः च आसन् । विमान-दुर्घटना-अन्वेषण-विभागः दुर्घटनायाः कारणं ज्ञातुं अन्वेषणं प्रारभत। नागरिक-विमानयान-मन्त्रालयः अद्य सूचितवान् यत् दुर्भाग्यपूर्णस्य विमानस्य कृष्णपेटिका पुनः प्राप्ता । मन्त्रालयः अवदत् यत्, अन्वेषणं द्रुतगत्या प्रचलति तथा पूर्णतया पारदर्शकं, कालबद्धं च अन्वेषणं सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति ।

## बीटिङ्ग् रिट्रीट्ः

सप्तसप्तति-तमस्य गणतन्त्र-समारोहस्य समापनं निदर्शयन् बीटिङ्ग्-रिट्रीट्-समारोहः अद्य नवदिल्ल्याः विजयचौक इत्यत्र सम्पन्नोऽभवत्। अस्मिन् अवसरे राष्ट्रपतिः द्रौपदीमुर्मू, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, रक्षामंत्री राजनाथसिंहः, अन्ये केन्द्रीयमन्त्रिणः च उपस्थिताः आसन्। अस्मिन् समारोहे भारतस्य जल-स्थल-वायु-सेनानां बैण्ड-दलैः सह केन्द्रीय-सशस्त्र-बल-सैन्यस्य दलमपि सशस्त्रसेनायाः अनुशासनं, ऐक्यं, कालातीतं आचरणं च प्रतिबिम्बयन्ती बैण्ड इत्यस्य प्रस्तुतिं अकरोत्। अस्यां प्रस्तुतौ समृद्ध-सैन्यपरम्परायाः बलस्य च प्रदर्शनं अपि सञ्जातम्।

## आवधिक-श्रम-बल-सर्वेक्षणम्

मुख्य-आर्थिक-परामर्शदः वी.अनन्त-नागेश्वरन्-वर्यः अवदत् यत् आवधिक-श्रम-बल-सर्वेक्षणस्य आरम्भात् आरभ्य देशे आजीविकायाः स्थितिः सुदृढा अभवत्। आर्थिक सर्वेक्षणम् 2025-26 इत्यस्मिन् विषये कथयन् श्री-नागेश्वरन्-वर्यः अवदत् यत्, 2023-24 तमे वर्षे निरुद्योगस्य मितिः षट्-प्रतिशन्मितः, त्रि-दशमलव-द्वे प्रतिशन्मितं यावत् न्यूना अभवत्। सः अवदत् यत्, महिला-श्रम-बलस्य सहभागित्वं प्रायः अष्टादश-प्रतिशन्मितैः अङ्कैः वर्धितम् अस्ति। सी. ई. ए. इत्यनेन अवदत् यत्, वर्षस्य प्रथम-नवमासेषु निरुद्योगस्य मितिः अन्तिम-त्रैमासिके निरन्तरं पञ्च-दशमलव-चत्वारि-प्रतिशन्मितः, चत्वारि-दशमलव-नवप्रतिशन्मितं यावत् न्यूना अभवत्।

## गोयल-कनाडा

केन्द्र-वाणिज्य-उद्योग-मन्त्री पियूष-गोयल-वर्यः अद्य परस्परविकासाय समृद्धये च भारत-कनाडा-देशयोः सहयोगं सुदृढं कर्तुम् उपायेषु विचाराणाम् आदानं प्रदानं च कृतवान्। नवदिल्ल्यां कनाडा-देशस्य ऊर्जा-प्राकृतिक-संसाधन-मंत्री श्री-टिम-हॉजसन इत्यनेन सह उपवेशनावधौ उभयपक्षौ ऊर्जासुरक्षायाः, महत्वपूर्णखनिजपदार्थानां, नवीकरणीयोर्जायाः च विषयेषु चर्चां कृतवन्तौ।

## डब्ल्यू. पी. एल्.-

महिला-प्रीमियर-लीग् इति क्रिकेट्-क्रीडायां यू. पी. वारियर्स् इत्येतत् दलम् अद्य सायङ्काले गुजरातस्य वडोदरानगरे रायल्-चैलेञ्जर्स्-बेङ्गलुरु इत्यनेन दलेन सह क्रीडिष्यति। एषा क्रीडा भारतीय-मानक-समयानुसारं सायं सार्ध-सप्त-वादने आरप्स्यते।

॥ इति वार्ता: ॥